दिनाङ्क :- 29.06.2024
प्रात: - 06: 55

## अमरनाथयात्रा

द्विपञ्चाशत्दिवसात्मकस्या: श्रीअमरनाथ- यात्राया: पवित्रगुहा-मन्दिररस्य वार्षिकी तीर्थयात्रा अद्य प्रात: सुदृढव्यवस्थामध्ये कश्मीरोपत्यकायां पहलगाम-बालटाल-मार्गाभ्याम् समारब्धा। इयं पवित्रायात्रा अगस्त मासस्य नवदशदिनांके श्रावण-पूर्णिमाया: शुभावसरे पूर्णतां प्राप्स्यति। केन्द्रशासित प्रदेशे एतस्मिन् यात्राम् अभिलक्ष्य प्रशासनेन संचालन व्यवस्थां सुनिश्चितुं सुरक्षाया: व्यापक-प्रबन्धनम् स्थापितम् सुनियोजितम् च।

## मन की बात

प्रधानमन्त्री नरेन्द्रमोदी आकाशवाण्या: "मन की बात" कार्यक्रमे श्व: देशवासिभिः साकं विचार-विनिमयं करिष्यति। "मन की बात" इति मासिक-कार्यक्रमस्य इदं एकादशाधिकैक-संस्करणं भविता। अस्य कार्यक्रमस्य प्रसारणं आकाशवाण्याः दूरदर्शनस्य च सर्वाभिः वाहिनिभिः प्रसारयिष्यते। अयं कार्यक्रमः आकाशवाणी-दूरदर्शन-प्रधानमन्त्री-कार्यालय-सूचनाप्रसारणमन्त्रालय-इत्येतेषां यूट्यूब-वाहिनीष्वपि द्रष्टुं शक्यते इति। प्रधानमन्त्रिणः सम्बोधनानन्तरं अनुक्षणं अयं कार्यक्रमः क्षेत्रीय-भाषाष्वपि श्रोतुं शक्यते।

-

## राष्ट्रियपरीक्षाभिकरणम्

राष्ट्रियपरीक्षाभिकरणेन एन.टी.ए इत्याख्येन ह्य: सी.एस.आई. आर. यू.जी.नेट- यूजीसीनेट-चेत्यादीनां परीक्षाणां तिथय: पुन: समुद्घोषिता:। एकस्मिन् प्रख्यापिते पत्रे एन्.टी.ए. इत्यनेन समुद्घोषितं यत् एन.सी.ई.टी. इत्यस्य परीक्षा जुलाई मासस्य दशमे दिनांके यू.जी.सी नेट इत्यस्य परीक्षा सम्प्रति अगस्तमासस्य एकविंशति दिनांकत: सितम्बरमासस्य चतुर्थ दिनांक पर्यन्तं इत्यनयो: दिनांकयो: मध्ये आयोजयिष्यते।

## लोकसभाराज्यसभास्थगनम्

नीट्-परीक्षायां कथितानियमितताया: विषये विपक्षिदलानां विरोधस्य कारणेन लोकसभा आदिवसं स्थगिता जाता। प्रथम-स्थगनस्य अनन्तरं यदा मध्याह्ने द्वादश-वादने लोकसभायाः कार्याचरणं समारब्धं तदा काङ्ग्रेसदलस्य सदस्याः अस्मिन् विषये शिक्षामन्त्रिणः धर्मेन्द्रप्रधानस्य त्यागपत्रस्य याचनं कुर्वन्तः उच्चैः उद्घोषितुम् आरब्धवन्तः। काँग्रेस्, द्रविडा मुनेत्र कड़गम-डीएमके, तृणमूल कांग्रेस- टीएमसी, समाजवादी पार्टी चेत्यादिदानां सांसदाः सदनमध्ये समागतवन्तः। लोकसभायाः अध्यक्षः ओम बिरला इत्यनेन उक्तं यत् अस्य विषयस्य विचारार्थं एका समितिः निर्मिता अस्ति। सः अवदत् यत् राष्ट्रपत्याभिभाषणस्य धन्यवादप्रस्तावे चर्चायाः समये सदस्याः एतत् विषयं उत्थापयितुं शक्नुवन्ति।

राज्यसभा

राष्ट्रपतिद्रौपदी-मुर्मूवर्यायाः अभिभाषणे धन्यवादप्रस्तावस्य विषये चर्चा ह्यः राज्यसभायां नीट्-प्रकरणे विपक्षस्य कोलाहलस्य मध्ये समारब्धा। चर्चायै एकविंशतिहोरायाः समयः एव निर्धारितः आसीत् । चर्चायाः आरम्भं कुर्वन् भाजपादलस्य सांसदः सुधांशु त्रिवेदी विगत-दशवर्षेषु नरेन्द्रमोदी-सर्वकारस्य सफलतायाः उल्लेखं कृतवान्। चर्चायां भाजपादलस्य सांसदाः कविता पाटीदारः कृष्णलाल पंवारः डॉ. भीमसिंहः, अनिलबोंडेः चेत्यादयः अपि भागं गृहीतवन्तः।

क्रिकेट्

क्रिकेट-प्रतिस्पर्धायाम्, पुरूषाणां विंशति प्रति विंशतिः विश्वचषक प्रतिस्पर्धाया, भारतं दक्षिणाफ्रीकां अद्य सायं बारबाडोसइत्यत्र अन्तिमचक्रे द्वन्दे सम्मुखीकरिष्यति। इतः पूर्वं भारतेन उपान्त्यचक्रके द्वन्द्वे इंग्लैण्डदलं अष्टषष्टिः धावनांकैः पराजितम् ।